श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ चतुर्दशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्दशः सर्गः ॥

## दशरथेनाश्वमेधयज्ञस्य साङ्गोपाङ्गमनुष्ठानम्

अथ संवत्सरे पूर्णे तस्मिन् प्राप्ते तुरङ्गमे।
सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत॥ **1.14.1** ॥

ऋष्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः।
अश्वमेधे महायज्ञे राज्ञोऽस्य सुमहात्मनः॥ **1.14.2** ॥

कर्म कुर्वन्ति विधिवद् याजका वेदपारगाः।
यथाविधि यथान्यायं परिक्रामन्ति शास्त्रतः॥ **1.14.3** ॥

प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः।
चक्रुश्च विधिवत् सर्वमधिकं कर्म शास्त्रतः॥ **1.14.4** ॥

अभिपूज्य तदा हृष्टाः सर्वे चक्रुर्यथाविधि।
प्रातःसवनपूर्वाणि कर्माणि मुनिपुङ्गवाः॥ **1.14.5** ॥

ऐन्द्रश्च विधिवद् दत्तो राजा चाभिषुतोऽनघः।
माध्यन्दिनं च सवनं प्रावर्तत यथाक्रमम्॥ **1.14.6** ॥

तृतीयसवनं चैव राज्ञोऽस्य सुमहात्मनः।
चक्रुस्ते शास्त्रतो दृष्ट्वा यथा ब्राह्मणपुङ्गवाः॥ **1.14.7** ॥

आह्वयाञ्चक्रिरे तत्र शक्रादीन् विबुधोत्तमान्।
ऋष्यशृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः॥ **1.14.8** ॥

गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः।
होतारो ददुरावाह्य हविर्भागान् दिवौकसाम्॥ **1.14.9** ॥

न चाहुतमभूत् तत्र स्खलितं वा न किञ्चन।
दृश्यते ब्रह्मवत् सर्वं क्षेमयुक्तं हि चक्रिरे॥ **1.14.10** ॥

न तेष्वहःसु श्रान्तो वा क्षुधितो वा न दृश्यते।
नाविद्वान् ब्राह्मणः कश्चिन्नाशतानुचरस्तथा॥ **1.14.11** ॥

ब्राह्मणा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते।
तापसा भुञ्जते चापि श्रमणाश्चैव भुञ्जते॥ **1.14.12** ॥

वृद्धाश्च व्याधिताश्चैव स्त्रीबालाश्च तथैव च।
अनिशं भुञ्जमानानां न तृप्तिरुपलभ्यते॥ **1.14.13** ॥

दीयतां दीयतामन्नं वासांसि विविधानि च।
इति सञ्चोदितास्तत्र तथा चक्रुरनेकशः॥ **1.14.14** ॥

अन्नकूटाश्च दृश्यन्ते बहवः पर्वतोपमाः।
दिवसे दिवसे तत्र सिद्धस्य विधिवत् तदा॥ **1.14.15** ॥

नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा।
अन्नपानैः सुविहितास्तस्मिन् यज्ञे महात्मनः॥ **1.14.16** ॥

अन्नं हि विधिवत्स्वादु प्रशंसन्ति द्विजर्षभाः।
अहो तृप्ताः स्म भद्रं ते इति शुश्राव राघवः॥ **1.14.17** ॥

स्वलङ्कृताश्च पुरुषा ब्राह्मणान् पर्यवेषयन्।
उपासन्ते च तानन्ये सुमृष्टमणिकुण्डलाः॥ **1.14.18** ॥

कर्मान्तरे तदा विप्रा हेतुवादान् बहूनपि।
प्राहुः सुवाग्मिनो धीराः परस्परजिगीषया॥ **1.14.19** ॥

दिवसे दिवसे तत्र संस्तरे कुशला द्विजाः।
सर्वकर्माणि चक्रुस्ते यथाशास्त्रं प्रचोदिताः॥ **1.14.20** ॥

नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः।
सदस्यास्तस्य वै राज्ञो नावादकुशलो द्विजः॥ **1.14.21** ॥

प्राप्ते यूपोच्छ्रये तस्मिन् षड् बैल्वाः खादिरास्तथा।
तावन्तो बिल्वसहिताः पर्णिनश्च तथा परे॥ **1.14.22** ॥

श्लेष्मातकमयो दिष्टो देवदारुमयस्तथा।
द्वावेव तत्र विहितौ बाहुव्यस्तपरिग्रहौ॥ **1.14.23** ॥

कारिताः सर्व एवैते शास्त्रज्ञैर्यज्ञकोविदः।
शोभार्थं तस्य यज्ञस्य काञ्चनालङ्कृता भवन्॥ **1.14.24** ॥

एकविंशतियूपास्ते एकविंशत्यरत्नयः।
वासोभिरेकविंशद्भिरेकैकं समलङ्कृताः॥ **1.14.25** ॥

विन्यस्ता विधिवत् सर्वे शिल्पिभिः सुकृता दृढाः।
अष्टास्त्रयः सर्व एव श्लक्ष्णरूपसमन्विताः॥ **1.14.26** ॥

आच्छादितास्ते वासोभिः पुष्पैर्गन्धैश्च पूजिताः।
सप्तर्षयो दीप्तिमन्तो विराजन्ते यथा दिवि॥ **1.14.27** ॥

इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः।
चितोऽग्निर्ब्राह्मणैस्तत्र कुशलैः शिल्पकर्मणि॥ **1.14.28** ॥

स चित्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः।
गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः॥ **1.14.29** ॥

नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम्।
उरगाः पक्षिणश्चैव यथाशास्त्रं प्रचोदिताः॥ **1.14.30**॥

शामित्रे तु हयस्तत्र तथा जलचराश्च ये।
ऋषिभिः सर्वमेवैतन्नियुक्तं शास्त्रतस्तदा॥ **1.14.31**॥

पशूनां त्रिशतं तत्र यूपेषु नियतं तदा।
अश्वरत्नोत्तमं तत्र राज्ञो दशरथस्य ह॥ **1.14.32**॥

कौसल्या तं हयं तत्र परिचर्य समन्ततः।
कृपाणैर्विससारैनं त्रिभिः परमया मुदा॥ **1.14.33**॥

पतत्रिणा तदा सार्धं सुस्थितेन च चेतसा।
अवसद् रजनीमेकां कौसल्या धर्मकाम्यया॥ **1.14.34**॥

होताध्वर्युस्तथोद्गाता हस्तेन समयोजयन्।
महिष्या परिवृत्त्याथ वावातामपरां तथा॥ **1.14.35**॥

पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः।
ऋत्विक्परमसम्पन्नः श्रपयामास शास्त्रतः॥ **1.14.36**॥

धूमगन्धं वपायास्तु जिघ्रति स्म नराधिपः।
यथाकालं यथान्यायं निर्णुदन् पापमात्मनः॥ **1.14.37**॥

हयस्य यानि चाङ्गानि तानि सर्वाणि ब्राह्मणाः।
अग्नौ प्रास्यन्ति विधिवत् समस्ताः षोडशर्त्विजः॥ **1.14.38**॥

प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः।
अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते॥ **1.14.39**॥

त्र्यहोऽश्वमेधः सङ्ख्यातः कल्पसूत्रेण ब्राह्मणैः।
चतुष्टोममहस्तस्य प्रथमं परिकल्पितम्॥ **1.14.40**॥

उक्थ्यं द्वितीयं सङ्ख्यातमतिरात्रं तथोत्तरम्।
कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात्॥ **1.14.41** ॥

ज्योतिष्टोमायुषी चैवमतिरात्रौ च निर्मितौ।
अभिजिद्विश्वजिच्चैवमाप्तोर्यामौ महाक्रतुः॥ **1.14.42** ॥

प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः।
अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम्॥ **1.14.43** ॥

उद्गात्रे तु तथोदीचीं दक्षिणैषा विनिर्मिता।
अश्वमेधे महायज्ञे स्वयम्भूविहिते पुरा॥ **1.14.44** ॥

क्रतुं समाप्य तु तदा न्यायतः पुरुषर्षभः।
ऋत्विग्भ्यो हि ददौ राजा धरां तां कुलवर्धनः॥ **1.14.45** ॥

एवं दत्त्वा प्रहृष्टोऽभूच्छ्रीमानिक्ष्वाकुनन्दनः।
ऋत्विजस्त्वब्रुवन् सर्वे राजानं गतकिल्बिषम्॥ **1.14.46** ॥

भवानेव महीं कृत्स्नामेको रक्षितुमर्हति।
न भूम्या कार्यमस्माकं नहि शक्ताः स्म पालने॥ **1.14.47** ॥

रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप।
निष्क्रयं किञ्चिदेवेह प्रयच्छतु भवानिति॥ **1.14.48** ॥

मणिरत्नं सुवर्णं वा गावो यद्वा समुद्यतम्।
तत् प्रयच्छ नृपश्रेष्ठ धरण्या न प्रयोजनम्॥ **1.14.49** ॥

एवमुक्तो नरपतिर्ब्राह्मणैर्वेदपारगैः।
गवां शतसहस्राणि दश तेभ्यो ददौ नृपः॥ **1.14.50** ॥

दशकोटिं सुवर्णस्य रजतस्य चतुर्गुणम्।
ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु॥ **1.14.51** ॥

ऋष्यशृङ्गाय मुनये वसिष्ठाय च धीमते।
ततस्ते न्यायतः कृत्वा प्रविभागं द्विजोत्तमाः ॥ **1.14.52** ॥

सुप्रीतमनसः सर्वे प्रत्यूचुर्मुदिता भृशम्।
ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः ॥ **1.14.53** ॥

जाम्बूनदं कोटिसङ्ख्यं ब्राह्मणेभ्यो ददौ तदा।
दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम् ॥ **1.14.54** ॥

कस्मैचिद् याचमानाय ददौ राघवनन्दनः।
ततः प्रीतेषु विधिवद् द्विजेषु द्विजवत्सलः ॥ **1.14.55** ॥

प्रणाममकरोत् तेषां हर्षव्याकुलितेन्द्रियः।
तस्याशिषोऽथ विविधा ब्राह्मणैः समुदाहृताः ॥ **1.14.56** ॥

उदारस्य नृवीरस्य धरण्यां पतितस्य च।
ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ॥ **1.14.57** ॥

पापापहं स्वर्नयनं दुस्तरं पार्थिवर्षभैः।
ततोऽब्रवीदृष्यशृङ्गं राजा दशरथस्तदा ॥ **1.14.58** ॥

कुलस्य वर्धनं तत् तु कर्तुमर्हसि सुव्रत।
तथेति च स राजानमुवाच द्विजसत्तमः।
भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥ **1.14.59** ॥

स तस्य वाक्यं मधुरं निशम्य
प्रणम्य तस्मै प्रयतो नृपेन्द्रः।
जगाम हर्षं परमं महात्मा
तमृष्यशृङ्गं पुनरप्युवाच ॥ **1.14.60** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्दशः सर्गः ॥